
प्रथमः पाठः

1

# भोजस्य कथा

## (Story of Bhoj)



पुरा धाराराज्ये सिन्धुल नामक राजा चिरं प्रजाः अपालयत्। तस्य वृद्धावस्थायां भोजः इति पुत्रः अजायत्। स यदा पञ्चवर्षीयः आसीत् तदा तस्य पिता आत्मनः जरां ज्ञात्वा अनुजं महाबलं मुञ्जमवदत्—"त्वं मम पुत्रं भोजं परिपालय। अपि च यावद् असौ राज्यभारं वोढुम् अक्षमः तावत् त्वमेव राज्यं कुरु।"

दिवङ्गते राजनि राज्यं शासतः मुञ्जस्य पापबुद्धिः उत्पन्ना यद् अयं बालो यदा युवा भविष्यति तदा अहं राजा न भविष्यामि इति। ततः स भोजं हन्तुं निश्चित्य स्वमित्रं वत्सराजं प्राह– "त्वं भुवनेश्वरी विपिने निशायां भो हत्वा तस्य शिरः मह्यम देहि। वत्सराजः रात्रौ भोजं भुवनेश्वरी मन्दिरं नीत्वा अवोचत् – राजा भवतः वधः आदि इति। तस्मिन् काले भोजः स्वरक्तेन वटपत्रे एकं श्लोकम् अलिखत्। तेन श्लोकेन वैराग्यमापन्नः वत्सराजः भो भूमिगृहान्तरे सुरक्षितवान्। स्वयं च कृत्रिमं मस्तकं राजानं दर्शयित्वा प्राह "श्रीमता यद् आदिष्टं तत् साधितम्" इति ततः भोजस्य तत्पत्रं राज्ञेऽददात्। राजा पत्राक्षराणि अवाचयत् –

**मान्धाता च महीपतिः कृतयुगालङ्कार भूतो गतः,**
**सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।**
**अन्ये चापि युधिष्ठिर प्रभृतयो याता दिवं भूपते।**
**नैकेनापि समं गता वसुमती मुञ्ज! त्वया यास्यति॥**

राजा श्लोकस्यार्थं विचार्य अत्यन्तं लज्जितः सन् प्रायश्चित्तस्वरूपेण अग्नौ शरीरं दग्धुं समुद्यतः। तस्मिन्नेव का 'भोजः जीवति' इति रहस्यं वत्सराजः उद्घाटितवान्। तेन अतीव प्रसन्नः मुञ्जः भोजं राजसिंहासने स्थापयित्वा स्व पत्न्या सह तपोवनं गतवान्।



Scanned with CamScanner

## शब्दार्थाः (Word Meanings)

| | | |
|---|---|---|
| पुरा | – | प्राचीन काल में (In ancient time) |
| मम | – | मेरा (My) |
| यावत् | – | जब तक (Then) |
| जराम् | – | बूढ़ा (Old) |
| ज्ञात्वा | – | जानकर (Knowing) |
| मस्तकं | – | सिर (Head) |
| निशायाम् | – | रात में (In the night) |
| भुवनेश्वरीविपिने | – | भुवनेश्वरी के जंगल में (In the forest of Bhuwneshwari) |
| तपोवनं | – | जंगल (Forest) |
| वृद्धावस्थायां | – | बुढ़ापे की अवस्था में (In old age) |
| राज्यभारम् | – | राज्य का भार (Responsibilities of Kingdom) |

## अभ्यास कार्यम् (Exercise)

**मौखिकम् ( *मौखिक* ) *(Oral)***

**उच्चारणं कुरुत ( *उच्चारण कीजिए* ) *(Pronounce)***

| | | |
|---|---|---|
| वृद्धावस्थायाम् | वैराग्यमापन्नः | वोढुम् |
| भुवनेश्वरीविपिने | पत्राक्षराणि | अक्षमः |
| प्रायश्चित्तस्वरुपेण | स्थापयित्वा | निश्चित्य |
| भूमिगृहान्तरे | दिवङ्गते | आदिष्टः |
| दर्शयित्वा | श्लोकस्यार्थं | तस्मिन्नेव |

**लिखितम् ( *लिखित* ) *(Written)***

**1. एकपदेन उत्तरत ( *एक पद में उत्तर दीजिए* ) *(Answer in one word)***

(क) राजा सिन्धुलः कुत्र राज्यम् अकरोत्?

______________________________

(ख) मुञ्जस्य कीदृशी बुद्धिः उत्पन्ना?

______________________________

(ग) वत्सराजः भोजं कुत्र अनयत्?

______________________________



Scanned with CamScanner

(घ) वत्सराजः कस्य पत्रं राज्ञेऽददात्?

(ङ) मुञ्जः स्वयं पत्न्या सह कुत्र गतवान्?

**2. पूर्णवाक्येन उत्तरत ( पूर्ण वाक्य में उत्तर दीजिए )। (Answer in full sentence)**

(क) सिन्धुलः अनुजं मुञ्जं किम् अवदत्?

(ख) वत्सराजः भोजं भुवनेश्वरीमन्दिरं नीत्वा किम् अवोचत्?

(ग) वत्सराजः भोजं कुत्र सुरक्षितवान्?

(घ) भोजः केन रक्तेन वटपत्रे किम् अलिखत्?

(ङ) कृतयुग अलङ्कारः कः आसीत्?

**3. रिक्तस्थानानि पूरयत। ( रिक्त स्थानों की पूर्ति कीजिए )। (Fill in the blanks)**

(क) सिन्धुलः वृद्धावस्थायां ____________ इति पुत्रः अजायत्।

(ख) दिवङ्गते राजनि मुञ्जस्य ____________ उत्पन्ना।

(ग) यद् आदिष्टं तत् ____________ ।

(घ) ____________ जीवति इति रहस्यं वत्सराजः उद्घाटितवान्।

(ङ) मुञ्जः भोजं ____________ स्थापयित्वा तपोवनं गतवान्।

**4. शुद्धं कथानानां सम्मुखे ( ✓ ) चिह्न अशुद्धानां च ( ✗ ) चिह्नेन चिह्नित कुरुत ( शुद्ध कथनों के सामने ( ✓ ) चिह्न तथा अशुद्ध को ( ✗ ) चिह्न से चिह्नित कीजिए ) (Mark (✓) for true statement and (✗) for false one)**

| वाक्यानि | शुद्धम्/अशुद्धम् |
|---|---|
| (क) धाराराज्ये मुञ्जनामकः राजा प्रजाः अपालयत्। | ◯ |
| (ख) मुञ्जस्य सद्बुद्धिः उत्पन्ना। | ◯ |
| (ग) मुञ्जः सिन्धुलस्य अनुजम् आसीत्? | ◯ |
| (घ) भोजः वत्सराजस्यरक्तेन वटपत्रे श्लोकम् अलिखत्। | ◯ |
| (ङ) राजा पत्राक्षराणि अवाचयत्। | ◯ |



Scanned with CamScanner

5. **सन्धि - विच्छेदं कुरुत ( सन्धि - विच्छेद कीजिए ) (Disjoin the following words)**

| पदम् | | सन्धि विच्छेदः | | |
|---|---|---|---|---|
| यथा - वृद्धावस्था | = | वृद्धा | + | अवस्था |
| पत्राक्षराणि | = | ________ | + | ________ |
| शृगालङ्कार | = | ________ | + | ________ |
| एकेनापि | = | ________ | + | ________ |
| श्लोकस्यार्थ | = | ________ | + | ________ |

6. **कः किं प्रति कथयति? ( कौन किससे कहता है? ) (Who said to whom?)**

| कथनम् | कः | कम् प्रति |
|---|---|---|
| (क) त्वं मम पुत्रं भोजं परिपालय। | ________ | ________ |
| (ख) भोजं हत्वा तस्य शिरः मह्यम् देहि। | ________ | ________ |
| (ग) राजा भवतः वधः आदिष्टः। | ________ | ________ |
| (घ) श्रीमता यद् आदिष्टं तत् साधितम्। | ________ | ________ |

7. **संस्कृतभाषायाम् अनुवादं कुरुत ( संस्कृत भाषा में अनुवाद कीजिए )। (Translate in to Sanskrit)**

(क) मैं बाजार जाता हूँ।
________________________________

(ख) पिताजी फल लाते हैं।
________________________________

(ग) राधा गीत गाती है।
________________________________

(घ) श्याम लेख लिखता है।
________________________________

(ङ) माताजी खाना बनाती है।
________________________________



Scanned with CamScanner